# શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રમ્

shrIvarAhAShTottarashatanAmastotram

sanskritdocuments.org

May 6, 2018

# shrIvarAhAShTottarashatanAmastotram

# શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : varAhAShTottarashatanAmastotram

File name : varAhAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Source : varAhapurANe shrImuShNamAhAtmye

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 6, 2018

*sanskritdocuments.org*

# શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીમુષ્ણમાહાત્મ્યતઃ

શઙ્કરઃ

નારાયણ મમ બ્રૂહિ યેન તુષ્ટો જગત્પતિઃ ।
તૂર્ણમેવ પ્રસન્નાત્મા મુક્તિં યચ્છતિ પાપહા ॥ ૧॥

સદા ચઞ્ચલચિત્તાનાં માનવાનાં કલૌ યુગે ।
જપે ચ દેવપૂજાયાં મનો નૈકત્ર તિષ્ઠતિ ॥ ૨॥

તાદૃશા અપિ વૈ મર્ત્યા યેન યાન્તિ પરાં ગતિમ્ ।
અન્યેષાં કર્મણાં પુર્તિર્યેન સ્યાત્ ફલિતેન ચ ॥ ૩॥

તાદૃક્ સ્તોત્રં મમ બ્રૂહિ મહાપાતકનાશનમ્ ।
એકૈકં ચ વરાહસ્ય નામ વેદાધિકં કિલ ॥ ૪॥

તાદૃશાનિ ચ નામાનિ વરાહસ્ય મહાત્મનઃ ।
સન્તિ ચેદ્બ્રૂહિ વિશ્વાત્મન્ શ્રેતું કૌતૂહલં હિ મે ॥ ૫॥

શ્રીનારાયણઃ

શૃણુ શઙ્કર વક્ષ્યામિ વરાહસ્તોત્રમુત્તમમ્ ।
દુષ્ટગ્રહકુઠારોઽયં મહાપાપદવાનલઃ ॥ ૬॥

મહાભયગિરીન્દ્રાણામ્ કુલિશં મુક્તિદં શુભમ્ ।
કામધુક્ કામિનામેતદ્ભક્તાનાં કલ્પપાદપઃ ॥ ૭॥

વક્ષ્યામિ પરમં સ્તોત્રં યત્સુગોપ્યં દુરાત્મનામ્ ।
નારાયણ ઋષિશ્ચાત્ર શ્રીવરાહશ્ચ દેવતા ॥ ૮॥

છન્દોઽનુષ્ટુપ્ ચ હું બીજં હ્રીં શક્તિઃ ક્લીં ચ કીલકમ્ ।
વરાહપ્રીતિમુદ્દિશ્ય વિનિયોગસ્તુ નિર્વૃતૌ ॥ ૯॥

ન્યસેદ્ધૃદયં દ્રેકારં વરાહાય ચ મૂર્ધનિ ।

નમો ભગવતે પશ્ચાચ્છિખાયાં વિન્યસેદ્બુધઃ ॥ ૧૦॥

જ્ઞાનાત્મને ચ નેત્રાભ્યાં કવચાય બલાત્મને ।
ભૂર્ભુવઃ સુવ ઇત્યસ્ત્રાય ફટિત્યન્તં ન્યસેદ્બુધઃ ॥ ૧૧॥

યજ્ઞાય યજ્ઞરૂપાય યજ્ઞાઙ્ગાય મહાત્મને ।
નમો યજ્ઞભુજે યજ્ઞકૃતે યજ્ઞેશ્વરાય ચ ॥ ૧૨॥

યજ્ઞસ્ય ફલદાત્રે ચ યજ્ઞગુહ્યાય યજ્વને ।
એભિર્નામપદૈર્દિવ્યૈરઙ્ગુલિન્યાસમાચરેત્ ॥ ૧૩॥

અન્નદાત્રે નમ ઇતિ કરપૃષ્ઠં ચ માર્જયેત્ ।
નમઃ શ્વેતવરાહાય સ્વાહાન્તેન મહામતિઃ ॥ ૧૪॥

વ્યાપકન્યાસકૃત્પશ્ચાદ્ધ્યાયેદ્દેવમધોક્ષજમ્ ।
ધ્યાનમ્-
ૐ શ્વેતં સુદર્શનદરાઙ્કિતબાહુયુગ્મં
દંષ્ટ્રાકરાલવદનં ધરાય સમેતમ્ ।
બ્રહ્માદિભિઃ સુરગણૈઃ પરિસેવ્યમાનં
ધ્યાયેદ્વરાહવપુષં નિગમૈકવેદ્યમ્ ॥ ૧૫॥

શ્રીવરાહો મહીનાથઃ પૂર્ણાનન્દો જગત્પતિઃ ।
નિર્ગુણો નિષ્કલોઽનન્તો દણ્ડકાન્તકૃદવ્યયઃ ॥ ૧૬॥

હિરણ્યાક્ષાન્તકૃદ્દેવઃ પૂર્ણષાડ્ગુણ્યવિગ્રહઃ ।
લયોદધિવિહારી ચ સર્વપ્રાણિહિતે રતઃ ॥ ૧૭॥

અનન્તરૂપોઽનન્તશ્રીર્જિતમન્યુર્ભયાપહઃ ।
વેદાન્તવેદ્યો વેદી ચ વેદગર્ભઃ સનાતનઃ ॥ ૧૮॥

સહસ્રાક્ષઃ પુણ્યગન્ધઃ કલ્પકૃત્ ક્ષિતિભૃદ્ધરિઃ ।
પદ્મનાભઃ સુરાધ્યક્ષો હેમાઙ્ગો દક્ષિણામુખઃ ॥ ૧૯॥

મહાકોલો મહાબાહુઃ સર્વદેવનમસ્કૃતઃ ।
હૃષીકેશઃ પ્રસન્નાત્મા સર્વભક્તભયાપહઃ ॥ ૨૦॥

યજ્ઞભૃદ્યજ્ઞકૃત્સાક્ષી યજ્ઞાઙ્ગો યજ્ઞવાહનઃ ।
હવ્યભુગ્ઘવ્યદેવશ્ચ સદાવ્યક્તઃ કૃપાકરઃ ॥ ૨૧॥

દેવભૂમિગુરુઃ કાન્તો ધર્મગુહ્યો વૃષાકપિઃ ।

સુવત્તુણ્ડો વક્રદંષ્ટ્રો નીલકેશો મહાબલઃ ॥ ૨૨॥

પૂતાત્મા વેદનેતા ચ વેદહર્તૃશિરોહરઃ ।
વેદાદિકૃદ્વેદગુહ્યઃ સર્વવેદપ્રવર્તકઃ ॥ ૨૩॥

ગભીરાક્ષસ્ત્રિધર્મા ચ ગમ્ભીરાત્મા મહેશ્વરઃ ।
આનન્દવનગો દિવ્યો બ્રહ્મનાસાસમુદ્ભવઃ ॥ ૨૪॥

વિન્ધુતીરનિવાસી ચ ક્ષેમકૃત્સાત્ત્વતાં પતિઃ ।
ઇન્દ્રત્રાતા જગત્ત્રાતા મહેન્દ્રોદ્દણવર્ગહા ॥ ૨૫॥

ભક્તવશ્યો સદોદ્યુક્તો નિજાનન્દો રમાપતિઃ ।
સ્તુતિપ્રિયઃ શુભાઙ્ગશ્ચ પુણ્યશ્રવણકીર્તનઃ ॥ ૨૬॥

સત્યકૃત્સત્યસઙ્કલ્પઃ સત્યવાક્સત્યવિક્રમઃ ।
સત્યેન ગૂઢઃ સત્યાત્મા કાલાતીતો ગુણાધિકઃ ॥ ૨૭॥

પરં જ્યોતિઃ પરં ધામ પરમઃ પુરુષઃ પરઃ ।
કલ્યાણકૃત્કવિઃ કર્તા કર્મસાક્ષી જિતેન્દ્રિયઃ ॥ ૨૮॥

કર્મકૃત્કર્મકાણ્ડસ્ય સમ્પ્રદાયપ્રવર્તકઃ ।
સર્વાન્તકઃ સર્વગશ્ચ સર્વાર્થઃ સર્વભક્ષકઃ ॥ ૨૯॥

સર્વલોકપતિઃ શ્રીમાન્ શ્રીમુષ્ણેશઃ શુભેક્ષણઃ ।
સર્વદેવપ્રિયઃ સાક્ષીત્યેતન્નામાષ્ટકં શતમ્ ॥ ૩૦॥

સર્વવેદાધિકં પુણ્યં વરાહસ્ય મહાત્મનઃ ।
સતતં પ્રાતરુત્થાય સમ્યગાચમ્ય વારિણા ॥ ૩૧॥

જિતાસનો જિતક્રોધઃ પશ્ચાન્મન્ત્રમુદીરયેત્ ।
બ્રાહ્મણો બ્રહ્મવિદ્યાં ચ ક્ષત્રિયો રાજ્યમાપ્નુયાત્ ॥ ૩૨॥

વૈશ્યો ધનસમૃદ્ધઃ સ્યાત્ શૂદ્રઃ સુખમવાપ્નુયાત્ ।
સદ્યો રોગાદ્વિમુચ્યેત શતવારં પઠેદ્યદિ ॥ ૩૩॥

સકામો લભતે કામાન્નિષ્કામો મોક્ષમાપ્નુયાત્ ।
સદ્યો રોગાદ્વિમુચ્યેત શતવારં પઠેદ્યદિ ॥ ૩૩॥

સકામો લભતે કામાન્નિષ્કામો મોક્ષમાપ્નુયાત્ ।
બાલરોગગ્રહાદ્યાશ્ચ નશ્યન્ત્યેવ ન સંશયઃ ॥ ૩૪॥

રાજદ્વારે મહાઘોરે સઙ્ગ્રામે શત્રુસઙ્કટે ।
સ્તોત્રમેતન્મહાપુણ્યં પઠેત્સદ્યો ભયાપહમ્ ॥ ૩૫॥

ઇત્યેતદ્ધારયેદ્યસ્તુ કરે મૂર્ધ્નિ હૃદન્તરે ।
તં નમસ્યન્તિ ભૂતાનિ મુચ્યતે સર્વતો ભયાત્ ॥ ૩૬॥

રાજપ્રસાદજનકં સર્વલોકવશઙ્કરમ્ ।
આભિચરિકકૃત્યાન્તં મહાભયનિવારણમ્ ॥ ૩૭॥

શતવારં પઠેદ્યસ્તુ મુચ્યતે વ્યાધિબન્ધનાત્ ।
યઃ પઠેત્ત્રિષુ કાલેષુ સ્તોત્રમેતજ્જિતેન્દ્રિયઃ ॥ ૩૮॥

વૈકુણ્ઠવાસમાપ્નોતિ દશપુર્વૈર્દશાપરૈઃ ।
અશ્વત્થમૂલેઽર્કવારે સ્થિત્વા સ્તોત્રં પઠેદ્યદિ ॥ ૩૯॥

અપસ્મારવિનાશઃ સ્યાત્ક્ષયરોગશ્ચ નશ્યતિ ।
મધ્યાહ્ને તુ ગુરોર્વારે જલમધ્યે શતં જપેત્ ॥ ૪૦॥

કુષ્ઠવ્યાધિવિનાશઃ સ્યાત્ જ્ઞાનં ચૈવાધિગચ્છાતિ ।
પ્રાતઃ પ્રાતઃ પઠેદ્યસ્તુ સ્તોત્રમેતચ્છુભાવહમ્ ॥ ૪૧॥

અન્ત્યકાલે સ્મૃતિર્વિષ્ણોર્ભવેત્ તસ્ય મહાત્મનઃ ।
અષ્ટોત્તરશતૈર્દિવ્યૈર્નામભિઃ કિટિરૂપિણઃ ॥ ૪૨॥

તુલસીમર્પયેદ્યસ્તુ સ મુક્તો નાસ્તિ સંશયઃ ।
પૂજાકાલે વરાહસ્ય નામ્નામષ્ટોત્તરં શતમ્ ॥ ૪૩॥

જપ્ત્વાઽથ જાપયિત્વા વા સામ્રાજ્યમધિગચ્છાતિ ।
નિષ્કામો મોક્ષમાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૪૪॥

અષ્ટોત્તરસહસ્રં તુ યઃ પઠેન્નિયતેન્દ્રિયઃ ।
પાયસેન તથા હુત્વા વન્ધ્યા પુત્રવતી ભવેત્ ॥ ૪૫॥

નમઃ શ્વેતવરાહાય ભૂધરાય મહાત્મને ।
નિરઞ્જનાય સત્યાય સાત્ત્વતાં પતયે નમઃ ॥ ૪૬॥

ઇતિ મન્ત્રં પઠેન્નિત્યમન્તે મોક્ષમવાપ્નુયાત્ ॥ ૪૭॥

ઇતિ શ્રીવરાહપુરાણે શ્રીમુષ્ણમાહાત્મ્યે નવમોઽધ્યાયઃ ।
નીલવરાહપરબ્રહ્મણે નમઃ ।

ઇતિ શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIvarAhAShTottarashatanAmastotram*
pdf was typeset on May 6, 2018

Please send corrections to *sanskrit@cheerful.com*